अथवा

# PS/UM-II/6/124/19

## षष्ठपत्रम्

## दर्शनम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (20×2=40)

1. ग्रन्थारम्भे ग्रन्थकारः कीदृशं मङ्गलं करोति?
2. द्वादशलक्षणीत्यस्य कोऽर्थः?
3. प्रथमसूत्रे अथ शब्दार्थः कः?
4. धर्मलक्षणं लिखत।
5. चोदनापदार्थः कः?
6. को नाम विधिः?

अथवा

दशलकारेषु विद्यमानः समानधर्मः कः?

7. का नाम आर्थी भावना?
8. भावनायां कीदृशमंशत्रयमपेक्षते?

अथवा

किं नाम करणत्वम्?

9. दर्शपूर्णमासयागस्य फलं किम्? तद् वाक्यं लिखत।
10. कः विनियोगविधिः?
11. वाक्यभेदपरिहाराय कः उपायः?
12. उद्भिद्यागस्य फलं किम्?
13. यागस्य द्वे रूपे के?

अथवा

विनियोगविधेः सहकारिप्रमाणानि कानि?

14. वाक्यं सोदाहरणं वर्णयत।
15. का नाम प्रकृतिः? किमुदाहरणं तस्याः?



Scanned by CamScanner

16. प्रकरणस्य द्वौ भेदौ कौ ?

17. को ना संदंशः ?

**अथवा**

सन्निपायोपकारकं विलिखत।

18. प्रयोगविधिः किं बोधयति ?

19. पञ्च प्रयाजान् लिखत।

20. के मन्त्राः ?

**अथवा**

अर्थवादः कथं धर्मे प्रमाणम् ?

**स. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयः।** (5×8=40)

21. तन्त्रारम्भं सूत्रार्थं वर्णयत।

22. भावनां, तस्याः भेदौ च व्याख्यात।

23. विशिष्टविधिविचारमुपस्थापयत।

**अथवा**

प्रकरण प्रमाणं वर्णयत।

24. क्रमस्वरूपं क्रमबोधकप्रमाणानि विवेचयत।

**अथवा**

श्रुतिलिङ्गयोः विरोधे बलाबलं विवेचयत।

25. नामधेयस्वीकारे निमित्तचतुष्टयमुपस्थापयत।

**अथवा**

विधेः त्रैविध्यं व्याख्यात।

**स. एकस्य विवरणात्मकमुत्तरं लिखत।** (1×20=20)

26. धर्मः।

**अथवा**

विधिः, तस्य चत्वारो भेदाः।

**अथवा**

प्रतिषेधः पर्युदासश्च।



Scanned by CamScanner